**चतुर्थः पाठः**

# सुभाषितानि

**''सुभाषितम्'' इत्यस्य अर्थः 'सु'–सुष्ठु 'भाषितम्'–कथितम् इति। सम्यक् भाषितं सुभाषितं भवति। शोभनं वचनं सुभाषितम् इति कथ्यते। सुभाषिते महापुरुषाणाम् अनुभवः छन्दोबद्धेन श्लोकेन प्रस्तूयते। तादृशानि कानिचित् सुभाषितानि अत्र वर्तन्ते।**

## (सज्जन–प्रशंसा)

*गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा।*
*पापं तापं च दैन्यं च घ्नन्ति सन्तो महाशयाः ॥1॥*

**अन्वयः** - गङ्गा पापं (हन्ति), शशी तापं (हन्ति), कल्पतरुः च दैन्यं (हन्ति) तथा सन्तः महाशयाः पापं तापं दैन्यं च (त्रीणि अपि) घ्नन्ति।

**शब्दार्थः** -

| | | |
|---|---|---|
| शशी | - | चन्द्रमा |
| दैन्यम् | - | दीनता/गरीबी |
| घ्नन्ति | - | नाश करते हैं |
| कल्पतरुः | - | देववृक्ष/कल्पवृक्ष (जो सभी की कल्पित कामनाओं को पूर्ण करता है) |

## (दान–प्रशंसा)

*दानेन भूतानि वशीभवन्ति*
*दानेन वैराण्यपि यान्ति नाशम्।*
*परोऽपि बन्धुत्वमुपैति दानै-*
*र्दानं हि सर्वव्यसनानि हन्ति ॥2॥*

**अन्वयः** - दानेन भूतानि वशीभवन्ति, दानेन वैराणि अपि नाशं यान्ति, दानैः परः अपि बन्धुत्वम् उपैति, हि दानं सर्वव्यसनानि हन्ति।

**शब्दार्थः** -

| | | |
|---|---|---|
| भूतानि | - | प्राणी |
| वैराणि | - | शत्रुभाव |
| परः | - | पराया/दूसरा |
| उपैति | - | बन जाता है/प्राप्त हो जाता है |
| व्यसनानि | - | बुरी आदतें |

## (उद्यम – प्रशंसा)

*नात्युच्चशिखरो मेरुर्नातिनीचं रसातलम् ।*
*व्यवसायद्वितीयानां नाप्यपारो महोदधिः ॥3॥*

**अन्वयः** - व्यवसायद्वितीयानां कृते मेरुः शिखरः अत्युच्चः न, रसातलम् अतिनीचं न, महोदधिः अपि अपारः न।

**शब्दार्थः** - व्यवसायद्वितीयानाम् - उद्यमशील लोगों के लिए

अत्युच्चः - अत्यन्त ऊँचा

रसातलम् - पृथ्वी के नीचे का रसातल नामक छठा लोक

अपारः - अगम्य

## (वीरपुरुष–प्रशंसा)

*विनाप्यर्थैर्वीरः स्पृशति बहुमानोन्नतिपदं,*
*समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः ।*
*स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां,*
*द्युतिं सैंहीं श्वा किं धृतकनकमालोऽपि लभते ॥4॥*

**अन्वयः** - वीरः अर्थैः विना अपि बहुमानोन्नतिपदं स्पृशति, कृपणः अर्थैः समायुक्तः अपि परिभवपदं याति, गुणसमुदयावाप्तिविषयां स्वभावाद् उद्भूतां सैंहीं द्युतिं धृतकनकमालो श्वा अपि किं लभते ?

**शब्दार्थः** - अर्थैः विना - धन से रहित/धन के बिना

बहुमानोन्नतिपदम् - अत्यन्त सम्मान एवं उन्नति के स्थान को

परिभवपदम् - पराजयता को

गुणसमुदयावाप्तिविषयाम् - गुणों के समुदाय को प्राप्त कराने वाली को

सैंहीं द्युतिम् - सिंह की कान्ति को

धृतकनकमालः - स्वर्ण माला को धारण करने वाला

श्वा - कुत्ता

## (गुण–प्रशंसा)

*गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम् ।*
*केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः ॥5॥*

**अन्वयः** - दूरे अपि वसतां सतां गुणाः दूतत्वं कुर्वन्ति, षट्पदाः केतकीगन्धम् आघ्राय स्वयम् आयान्ति।

**शब्दार्थः** - दूतत्वम् - दूत के कार्य

सताम् - सज्जनों के

| | | |
|---|---|---|
| षट्पदाः | - | भौंरें |
| केतकीगन्धम् | - | केवड़े के गन्ध को |
| आघ्राय | - | सूँघकर |

## (वाग्भूषणम्)

*केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,*
*न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।*
*वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,*
*क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥6॥*

**अन्वयः** - पुरुषं केयूराः न, चन्द्रोज्ज्वलाः हाराः न, स्नानं न, विलेपनं न, कुसुमं न, अलङ्कृताः मूर्धजाः न विभूषयन्ति, एका वाणी (एव) पुरुषं समलङ्करोति या संस्कृता धार्यते, भूषणानि खलु सततं क्षीयन्ते, वाग्भूषणं भूषणम् (अस्ति) ।

**शब्दार्थः** -

| | | |
|---|---|---|
| विलेपनम् | - | चन्दनादि सुगन्धित पदार्थों का लेप |
| मूर्धजाः | - | केश |
| समलङ्करोति | - | सुशोभित करती है |
| संस्कृता | - | संस्कारमयी |
| क्षीयन्ते | - | नष्ट हो जाते हैं/तिरस्कृत हो जाते हैं । |

## (क्षमा)

*क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति ।*
*अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ॥7॥*

**अन्वयः** - यस्य करे क्षमाशस्त्रं (विद्यते), (तस्य) दुर्जनः किं करिष्यति ?, (यथा) अतृणे पतितः वह्निः स्वयम् एव उपशाम्यति ।

**शब्दार्थः** -

| | | |
|---|---|---|
| अतृणे | - | तृण (घास) से रहित |
| उपशाम्यति | - | उपशमित हो जाता है/शान्त हो जाता है । |
| करे | - | हाथ में |
| वह्निः | - | अग्नि |

## (मित्र–स्वरूपम्)

*मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः*
*पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण तद् दुर्लभम् ।*
*ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-*
*स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ॥8॥*

**अन्वयः** - मित्रं प्रीतिरसायनं, नयनयोः चेतसः (च) आनन्दनं, यत् मित्रेण सह सुखदुःखयोः पात्रं भवति तद्दुर्लभम्, ये च अन्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुलाः (भवन्ति) ते सर्वत्र मिलन्ति, तेषां (कृते) विपत् तु तत्त्वनिकषग्रावा (इव भवति) ।

| | | |
|---|---|---|
| **शब्दार्थ: -** प्रीतिरसायनम् | - | प्रेमरूपी रस का आश्रय/ प्रेमरूपी औषधि |
| चेतस: | - | चित्त का |
| आनन्दनम् | - | आनन्दित करने वाला |
| अन्ये | - | दूसरे |
| द्रव्याभिलाषाकुला: | - | धन प्राप्ति की कामना करने वाले |
| तत्त्वनिकषग्रावा | - | तत्त्व रूपी कसौटी का पत्थर |

## (स्वभाव–महिमा)

***सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणा: ।***
***अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते ॥9॥***

**अन्वय: -** सर्वस्य स्वभावा: हि परीक्ष्यन्ते, इतरे गुणा: न, हि सर्वान् गुणान् अतीत्य स्वभावः मूर्ध्नि वर्तते।

| | | |
|---|---|---|
| **शब्दार्थ: -** परीक्ष्यन्ते | - | परीक्षा की जाती है |
| इतरे | - | दूसरे |
| अतीत्य | - | छोड़कर |
| मूर्ध्नि | - | मस्तक पर (सर्वोच्च) |

## (अल्पज्ञ–स्वभाव:)

***यदा किञ्चिज्ज्ञोऽहं गज इव मदान्ध: समभवं,***
***तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मन: ।***
***यदा किञ्चित्-किञ्चिद् बुधजनसकाशादवगतं***
***तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगत: ॥10॥***

**अन्वय: -** यदा अहं किञ्चिद् ज्ञ: (आसम्) तदा (अहं) गज इव मदान्ध: समभवम्, सर्वज्ञ: अस्मि इति मम मन: अवलिप्तम् अभवत्। यदा किञ्चित्-किञ्चिद् बुधजनसकाशात् अवगतं तदा मूर्ख: अस्मि इति मे मद: ज्वर इव व्यपगत:।

| | | |
|---|---|---|
| **शब्दार्थ: -** किञ्चिज्ज्ञ: | - | थोड़ा जानने वाला |
| मदान्ध: | - | घमण्ड में चूर |
| अवलिप्तम् | - | अभिमान में संलग्न |
| बुधजनसकाशात् | - | विद्वानों की सङ्गति से |
| अवगतम् | - | जाना |
| व्यपगत: | - | दूर हो गया |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) गङ्गा किं हन्ति ?

(ख) केतकीगन्धम् आघ्राय के स्वयम् आयान्ति ?

(ग) सर्वोत्तमं भूषणं किम् अस्ति ?

(घ) प्रीतिरसायनं किम् अस्ति ?

(ङ) सर्वस्य के परीक्ष्यन्ते ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) केषां कृते महोदधिः अपारो नास्ति ?

(ख) अर्थैः समायुक्तोऽपि कः परिभवपदं याति ?

(ग) सन्तः कानि घ्नन्ति ?

(घ) कान् अतीत्य कः मूर्ध्नि वर्तते ?

(ङ) कीदृशो वह्निः स्वयम् उपशाम्यति ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) दानेन कानि भवन्ति ?

(ख) पुरुषं के न विभूषयन्ति ?

(ग) बुधजनसकाशात् मे किमभवत् ?

4. **रिक्तस्थानानि पूरयत –**

(क) दानेन .............................. वशी भवन्ति। (भूतानि/प्रेताः)

(ख) द्युतिं सैंहीं .............................. किं धृतकनकमालोऽपि लभते। (श्वा/अश्वाः)

(ग) केतकीगन्धमाघ्राय स्वयमायान्ति ..............................। (आपदाः/षट्पदाः)

(घ) क्षमाशस्त्रं करे यस्य .............................. किं करिष्यति। (सज्जनः/दुर्जनः)

(ङ) अतीत्य हि गुणान्सर्वान् .............................. मूर्ध्नि वर्तते। (स्वभावो/दुर्भावो)

5. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) शशी | भूषणम् |
| (ख) वाग्भूषणम् | तापम् |
| (ग) गज इव | मदो मे व्यपगतः |
| (घ) मित्रम् | मदान्धः |
| (ङ) ज्वर इव | प्रीतिरसायनम् |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) अलङ्कृता: मूर्धजा: पुरुषं विभूषयन्ति। ☐

(ख) संस्कृता वाणी पुरुषं समलङ्करोति। ☐

(ग) तृणे पतितो वह्नि: स्वयमेवोपशाम्यति। ☐

(घ) दानेन परोऽपि बन्धुत्वमुपैति। ☐

(ङ) धृतकनकमाल: श्वा सैंहीं द्युतिं लभते। ☐

7. **अधोलिखितक्रियापदानां लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| यथा - अस्मि | अस् | लट्लकार: | उत्तमपुरुष: | एकवचनम् |
| (क) घ्नन्ति | | | | |
| (ख) हन्ति | | | | |
| (ग) क्षीयन्ते | | | | |
| (घ) करिष्यति | | | | |

8. **उदाहरणानुसारं पर्यायशब्दं लिखत -**

**यथा -गङ्गा - देवनदी**

(क) सन्त: -

(ख) शिखर: -

(ग) वीर: -

(घ) षट्पदा: -

(ङ) नयनयो: -

9. **रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत -**

(क) **<u>ते</u>** सर्वत्र मिलन्ति।

(ख) **<u>दानेन</u>** वैराण्यपि नाशं यान्ति।

(ग) **<u>कृपण:</u>** परिभवपदं याति।

(घ) **<u>मे</u>** मद: ज्वर इव व्यपगत:।

(ङ) केयूरा: **<u>पुरुषं</u>** न विभूषयन्ति।

### 10. श्लोकपूर्तिं कुरुत -

(क) गङ्गा पापं शशी तापं ....................................... ।

.................................... घ्नन्ति सन्तो महाशयाः ॥

(ख) ........................................ नातिनीचं रसातलम् ।

व्यवसायद्वितीयानां ....................................... ॥

(ग) गुणाः कुर्वन्ति दूतत्वं ...................................... ।

...................................... स्वयमायान्ति षट्पदाः ॥

(घ) ....................................... दुर्जनः किं करिष्यति ।

अतृणे पतितो वह्निः ....................................... ॥

(ङ) सर्वस्य हि परीक्ष्यन्ते ........................................ ।

....................................... स्वभावो मूर्ध्नि वर्तते ॥

### योग्यताविस्तारः -

- पाठे समागतान् श्लोकान् कण्ठस्थं कुरुत ।
- पाठ्यपुस्तकेतराणि सुभाषितानि पठत ।
- पाठ्यपुस्तकेतरान् दशसुभाषितश्लोकान् लिखत ।